0124CH05

# 5 कति?

## पितामहेन सह बहिः गमनम् !




बालकाः चित्रं दृष्ट्वा उद्याने एतेषु गतिविधिषु ते कति गतिविधीन् कुर्वन्ति इति वदेयुः। ते उद्याने आगतानां जनानां संख्यायाः विषये अपि चर्चां कर्तुं शक्नुवन्ति, यथा प्रथमचित्रे कति बालकाः क्रीडन्ति, कति च तैः सह सम्मिलिताः इति। स्वपितामही-पितामहाभ्यां सह समययापने विद्यमान- महत्त्व-विषये बलकैः सह चर्चां कुर्वन्तु, तेषां मतं वा अभिजानन्तु। तान् प्रति आदरं दर्शयितुं विद्यमानानाम् उपायानां विषये च चर्चां कुर्वन्तु ।



© NCERT not to be republished




## वदन्तु आहत्य कति? रिक्तस्थानानि पूरयन्तु।








**4** बालकाः तथा **2** बालकौ मिलित्वा ___ बालकाः भवन्ति।

4 + 2 = ☐


**3** भ्रमरकानि तथा **1** भ्रमरकं मिलित्वा _____ भ्रमरकानि भवन्ति।

3 + 1 = ☐

**3** पिपीलिकाः तथा **2** पिपीलिके मिलित्वा _____ पिपीलिकाः भवन्ति।

3 + 2 = ☐





**4** अंकन्यः तथा **3** अंकन्यः मिलित्वा _____ अंकन्यः भवन्ति।


4 + 3 = ☐

बालकेभ्यः बहूनां मूर्तवस्तूनाम् साहाय्येन सङ्कलनं(addition) कर्तुं पर्याप्तम् अवसराः प्रदातव्याः। समूहद्वये विद्यमानवस्तूनां संयोजनेन तेषां वस्तूनां योगं () स+D870म्पादयितुं(aggregation), तथैव इतोऽपि अधिकानां वस्तूनां संयोजनार्थं (augmentation) च बालकाः प्रेरणीयाः। एवम् उपरिप्रदर्शित-द्विविध-योजनेन सम्बद्धानां समस्यानां विषये बालकैः सह पर्याप्तम् अभ्यासकार्यं कारणीयम्।



© NCERT not to be republished


## योजयन्तु चित्रयन्तु च



____________________

6 कन्दुकानि तथा 2 कन्दुके च मिलित्वा ______ कन्दुकानि भवन्ति।

6+2 = ☐



7 + 1 = ☐



## एहि गणयाम

क. भवतः मातापित्रोः कृते आहत्य कति भ्रातरः भगिन्यः च सन्ति ?

ख. भवतः परिवारे भवतः मित्रस्य परिवारे च आहत्य कति जनाः सन्ति ?

ग. भवतः हस्तयोः पादयोः च कति अङ्गुल्यः सन्ति ?






घ. भवान् अङ्गुलीभिः कति सङ्ख्याः गणयितुं शक्नोति ?

संकलन-वाक्यानाम् अवगमनार्थम् उच्चैः वक्तुं च बालकान् प्रोत्साहयन्तु। उदाहरणार्थं 4 बालकाः तथा 2 बालकौ मिलित्वा 6 बालकाः भवन्ति। 'मेलनं' इति शब्दः संकलनस्य (+) चिह्नेन 'आहत्य' इति शब्दः च समानस्य (=) चिह्नेन सह संयोजयन्तु,। 'प्रतीकशब्दानां(+,=) परिचयात् पूर्वं आहत्य', मिलित्वा, इत्यादिशब्दैः अमूर्तवस्तूनां सहाय्येन संकलनम् अधिगन्तुं बालकेभ्यः अवसराः प्रदेयाः।



© NCERT not to be republished


## आहत्य अङ्गुलीनां सङ्ख्यां गणयित्वा लिखन्तु।


| | |
|---|---|
|  | 4 + 3 = |
|  | 3 + 2 = |
|  | 5 + 3 = |
|  | 4 + 0 = |
|  | 4 + 4 = |



## एहि क्रीडाम - पाशकैः सह संकलनम्

पाशकयुग्मं क्रमेण क्षिपतु। उभयोः पाशकयोः आहत्य बिन्दुसङ्ख्यां जानातु। अधुना भवतः मित्रं पाशकयुग्मं क्षिपति। तस्य अपि आहत्य बिन्दुसङ्ख्यां जानातु। केन अधिकाः अङ्काः प्राप्ताः इति जानातु।





© NCERT not to be republished


## एहि करवाम

एतां पाशकक्रीडां किशोरः नित्या च अपि क्रीडितवन्तौ। अत्र तेषां पाशकबिन्दवः प्रदर्शिताः। किशोरः कतिवारं विजयं प्राप्तवान्, नित्या च कतिवारं विजयं प्राप्तवती इति तयोः प्राप्ताङ्क-फलके (✓) चिह्नं स्थापयित्वा जानातु।

| | किशोरः | नित्या |
|---|---|---|
| क. | ✓ | |
| ख. | | |
| ग. | | |
| घ. | | |
| ङ. | | |









© NCERT not to be republished


## मणयः सूत्रं च

अधोलिखितानां सङ्ख्यानाम् अनुसारं सूत्रे अनुस्यूताः मणीः रज्यन्तु। वर्णिताः सर्वाः मणयः च गणयन्तु।


क. 3 + 4 = ____




ख. 4 + 2 = ____




ग. 5 + 4 = ____



घ. 2 + 7 = ____



ङ. 7 + 3 = ____



बालकान् मणिसूत्रैः क्रीडितुं प्रेरयन्तु। संकलन-प्रक्रियायाः विषये ध्यानं दत्त्वा, तत्र प्रयुक्तानां युक्तीनां विषये च चर्चां कुर्वन्तु।




© NCERT not to be republished

# कूर्दित्वा योगं जानन्तु


4 + 2 =





3 + 2 =




5 + 3 =




6 + 3 =




© NCERT not to be republished

## स्वस्य विधिना योजयन्तु

अब्दुलः रिहाना च संख्याः द्वाभ्यां भिन्न-प्रकाराभ्यां संकलयन्ति। संख्यानां योगं ज्ञातुं तेषां साहाय्यं कुर्वन्तु।






|   |   |
|---|---|
| 2<br>+ 3<br>___ | 2 + 3 = ___ |
| 5<br>+ 1<br>___ | 5 + 1 = ___ |
| 3<br>+ 3<br>___ | 3 + 3 = ___ |
| 9<br>+ 1<br>___ | 9 + 1 = ___ |


© NCERT not to be republished


## एहि करवाम

क. संख्यायुग्मानि पूरयन्तु।




*कोणार्कसूर्यरथस्य चक्रम्*

ख. निम्नलिखितं संकलयित्वा मेलयन्तु।

| | | |
|---|---|---|
| 1 + 4 | 5 | 4 + 2 |
| 6 + 3 | 6 | 3 + 4 |
| 5 + 2 | 7 | 3 + 2 |
| 0 + 6 | 9 | 5 + 4 |

## परियोजना-कार्यम्

0 तः 9 पर्यन्तानां संख्याकानां दश पत्रकाणि स्वीकुर्वन्तु। पत्रकाणि एतादृशरीत्या व्यवस्थापयन्तु यत् तेषाम् आहत्य योगः ९ एव भवेत्।

तत्र अनेके उपायाः सन्ति। कति उपायैः भवन्तः कर्तुं शक्नवन्ति ?

☐ + ☐ = 9

☐ + ☐ + ☐ = 9

☐ + ☐ = 9

© NCERT not to be republished

## संकलनस्य कथा

क. राघवस्य  समीपे 4 शंखाः  सरितायाः च  समीपे 5 शंखाः सन्ति  । आहत्य तयोः समीपे कति शंखाः सन्ति ? ☐

ख. रञ्जितस्य समीपे 3 प्रस्तराणि , मीनाक्ष्याः समीपे च 6 प्रस्तराणि सन्ति । आहत्य तयोः समीपे कति प्रस्तराणि सन्ति ? ☐

ग. एकस्मिन् स्यूते 3 नारिकेलानि,  अन्यस्मिन् स्यूते च 4 नारिकेलानि  सन्ति । आहत्य सर्वेषु स्यूतेषु कति नारिकेलानि सन्ति? ☐

### एहि, अस्माकं स्यूतेषु किं किम् अस्ति इति पश्यामः।

मित्रेण सह एवमेव कृत्वा अधः उत्तराणि लिखन्तु।

क. मम स्यूते ______ पुस्तकानि सन्ति , मम मित्रस्य स्यूते च _____ पुस्तकानि सन्ति। अस्माकं द्वयोः समीपे आहत्य ______ पुस्तकानि सन्ति।


ख. मम समीपे ______ अङ्कन्यः मम मित्रस्य च समीपे ______ अङ्कन्यः सन्ति। अस्माकं समीपे आहत्य _____ अङ्कन्यः सन्ति।

ग. मम समीपे _____ टिप्पणी-पुस्तिकाः मम मित्रस्य च समीपे ________ टिप्पणी-पुस्तिकाः सन्ति। अस्माकं समीपे आहत्य ______ टिप्पणी-पुस्तिकाः सन्ति।



## चिन्तयन्तु कुर्वन्तु च

प्रदत्तपेटिकायां 1, 2 3 च सङ्ख्याः बिन्दुरेखाभिः दर्शितरीत्या लिखन्तु येन प्रत्येकं मार्गस्य योगः 6 एव भवेत् ।




एतत् कार्यं युग्मरूपेण कर्तुं शक्यते । बालकान् स्वकीयान् प्रश्नान् समस्याः च निर्मातुं प्रेरयन्तु। विगते पृष्ठे (पृष्ठसंख्या 56) प्रदत्तस्य ओडिशाराज्यस्य कोणार्कप्रदेशे स्थितस्य विश्वस्य प्राचीनतमस्य सूर्यमन्दिरस्थ-सूर्यरथचक्रस्य विषये अपि कक्षायां चर्चां कुर्वन्तु ।



© NCERT not to be republished

## पञ्च लघुबालाः

बसयाने बालाः हि पञ्च मोदन्ते
नृत्यन्ति च
एकस्य आगतं गृहम् शनैः शनैः कुरु
अवतरणम्
सर्वे हि ते गन्तारः अधुना यन्ति चत्वारः







बसयाने बाला चत्वारः
मोदन्ते नृत्यन्ति च
अन्यस्य आगतं गृहम्
शनैः शनैः कुरु अवतरणम्
आनन्दस्य इदं वयः
सम्प्रति बालाः वयं त्रयः




याने सन्ति बालाः त्रयः
मोदन्ते नृत्यन्ति च
अपरस्य आगतं गृहम्
शनैः शनैः कुरु अवतरणम्
गायन्तौ भ्रातरौ च तौ
अधुना याने बालौ द्वौ

© NCERT not to be republished

बसयाने हि बालौ द्वौ
मोदेते नृत्यत: च तौ
एकस्य आगतं गृहम्
शनै: शनै: कुरु अवतरणम्
मन्दं गच्छति मन्थरक:
अवशिष्ट: बाल: एक:







बसयाने एक: बाल:
किञ्चित् खिन्न: उपविष्ट:
तस्यापि आगतं गृहम्
मनो हर्षेण प्रफुल्लितम्
सर्वे प्राप्ता: स्वस्वगृहम्
स्थगितम् अधुना बसयानम्

## वार्तालापं करवाम

क. आरम्भे बसयाने कति बालाः आसन् ?

ख. प्रथमस्थानके बसयानात् कति बालाः अवतीर्णाः ?

ग. प्रथमस्थानकस्य अनन्तरं बसयाने कति बालकाः अवशिष्टाः सन्ति ?

घ. द्वितीयस्थानकस्य अनन्तरं कति बालकाः अवशिष्टाः?
तृतीयचतुर्थपञ्चमस्थानकानाम् अपि तथैव उत्तरं वदन्तु ।

ई. अन्ते बसयाने कति बालकाः अवशिष्टाः सन्ति ?

## परियोजना-कार्यम्

स्वगृहे जनानां संख्यां जानन्तु। तेषु कति विद्यालयं गच्छन्ति, कति जनाः कार्याय, कति च गृहे एव तिष्ठन्ति ?


© NCERT not to be republished


## एहि करवाम


### कति अवशिष्टाः ?

क. रिक्तस्थानानि पूरयन्तु।

i.







6 मण्डूकाः । 2 जले कूर्दतः । _____ अवशिष्टाः

6 – 2 = ______

ii.










7 वायुगोलाः । ______ डयितौ । 5 अवशिष्टाः ।

7 – 2 = ______

iii.







9 कदलीफलानि । 6 गृहीतानि । ____ अवशिष्टानि ।

9 – 6 = ______

© NCERT not to be republished

ख. अवशिष्टानि वस्तूनि चित्रयित्वा रिक्तस्थानानि पूरयन्तु।


i.

_____ पुष्पाधान्यः। _____ त्रुटिता। _____ अवशिष्टे पुष्पाधान्यौ।

3 − ______ = ______


ii.

*7 मोदकानि ।* 4 खादितानि । _____ मोदकानि अवशिष्टानि।

7 − 4 = ______


iii.

7 कन्दुकानि। ______ बालकैः स्वीकृतानि। ______ अवशिष्टानि।

7 − ______ = ______

ग. निम्नलिखितप्रश्नानाम् उत्तरं ददातु।

i. मनीषायाः  समीपे 9 कदलीफलानि  सन्ति।सा 3 कदलीफलानि खादितवती। अधुना कति कदलीफलानि अवशिष्टानि सन्ति ? [ ]


ii. पुष्पेषु 8  भृङ्गाः सन्ति । 5 भृङ्गाः डयिताः। अधुना कति भृङ्गाः अवशिष्टाः सन्ति ? [ ]

© NCERT not to be republished







## एहि करवाम

स्वयम् एकं दशबिन्दूनां पत्रं निर्माय, मित्रेभ्यः कतिपयान् बिन्दून् गोपयन्तु। कति बिन्दवः गोपिताः सन्ति इति तान् पृच्छन्तु।



**कति बिन्दवः गोपिताः कति बिन्दवः च दृश्यन्ते ?**

| आहत्य 10 बिन्दवः | गोपिताः बिन्दवः | दृश्यमानबिन्दवः |
|---|---|---|
|  | 0 | 10 |
|  | | |
|  | | |
|  | | |




## परियोजना-कार्यम्


बालकान् 8 बिन्दुयुक्तं समूहं निर्मातुं वदन्तु। अधुना तेषां हस्तेन करवस्त्रेण वा कतिपयान् बिन्दून् गोपयन्तु, कति बिन्दवः गोपिताः, कति च दृश्यन्ते इति पश्यन्तु। बिन्दुयुक्तसमूहे कश्चन क्रमः अस्ति वा इति अवलोकयन्तु ? अन्यसङ्ख्यानां कृते एतत् कार्यं विस्तारयन्तु । किम् एतत् भवन्तः बिन्दूनां गोपनं विनाऽपि कर्तुं शक्नुवन्ति?

© NCERT not to be republished

## संख्यापट्टिकायां पृष्ठतः कूर्दन्तु।





क. 9 तः 3 पदानां पश्चात् कूर्दन्तु ।




9 – 3 = 6

ख. 7 तः 4 पदानां पश्चात् कूर्दन्तु ।




7 – 4 = ______

## वियोजनं स्वरीत्या कुर्वन्तु।

क. 8 – 2 = ______

घ. 6 – 3 = ______

ख. 7 – 3 = ______

ङ. 5 – 1 = ______

ग. 9 – 5 = ______

च. 4 – 2 = ______

© NCERT not to be republished